
ISSN: 2582-7219



# International Journal of Multidisciplinary Research in Science, Engineering and Technology

*(A Monthly, Peer Reviewed, Refereed, Scholarly Indexed, Open Access Journal)*



Impact Factor: 8.206

Volume 8, Issue 7, July 2025

www.ijmrset.com ijmrset@gmail.com +91 6381 907 438 +91 63819 07438

© 2025 IJMRSET | Volume 8, Issue 7, July 2025| DOI:10.15680/IJMRSET.2025.0807061

ISSN: 2582-7219 | www.ijmrset.com | Impact Factor: 8.206| ESTD Year: 2018|

International Journal of Multidisciplinary Research in Science, Engineering and Technology (IJMRSET)

(A Monthly, Peer Reviewed, Refereed, Scholarly Indexed, Open Access Journal)

# संस्कृत शिक्षणे पाठ्यसहगामि क्रियाणां प्रयोगे शिक्षकाणां भूमिका

**डॉ. लक्ष्मण कुमार**

सहायक आचार्य, शिक्षा विभाग, राष्ट्रिय संस्कृत विश्वविद्यालयः तिरुपति,भारत

**'संस्कृत-शिक्षणम्':** संस्कृतं नाम का चित् भाषा । प्रकार्यदृष्ट्या अस्याः विभिन्नानि रूपाणि सन्ति, यथा सांस्कृतिक-भाषा, साहित्य-भाषा, सम्भाषणात्मिका भाषा, शास्त्र-भाषा, प्राचीनभाषा, राजभाषा, मातृभाषा, प्राविधिकभाषा, आधुनिकभाषा, वैज्ञानिकभाषा इत्यादीनि । प्रायः लोकस्य एषा सामान्या अवधारणा एव यत् शास्त्रपाठनं, साहित्यपाठनं, संस्कृतेः विषये पाठनं, संस्काराणां पाठनं, मूल्यानां पाठनम् एव संस्कृतपाठनम् इति ।

**अतः** स्पष्टमेव अस्ति यत् संस्कृतशिक्षणेन अभिप्रायः अस्ति भाषारूपेण संस्कृतभाषायाः विविधानां सामर्थ्यानां वर्धनम् इति । एवमेव भारतस्य संविधानानुसारं नूतनज्ञानेन सम्बद्धशब्दानां रचनयोग्यक्षमतायाः निर्माणम् अपि संस्कृतशिक्षणस्य किञ्चित् प्रमुखम् उद्देश्यम् अस्ति।

**'शिक्षणम्'**

**अयं कविरकविषु प्रचेता मर्तेष्वग्निरमृतो निधायि । (ऋग्वेदः ७।४।४) (अर्थात् एषः ज्ञानी विशेषत्वेन बुद्धिमान्, अज्ञानिषु मनुष्येषु स्थापितः ।)** विद्योपादाने' इत्यर्थे 'शिक्ष' इति धातुना निष्पन्नः शिक्षा इति शब्दः ज्ञानमिति द्योतयति । सामान्यतः ज्ञानस्य आदानस्य प्रदानस्य प्रक्रिया एव शिक्षणम् इति मन्यते। अनेन एषः एव अभिप्रायः यत् यया प्रक्रियया कोऽपि जनःअन्यान् जनान् पाठयितुं प्रयतते तत् एव शिक्षणम् इति। ऋग्वेदस्य उपर्युक्तं वचनं शिक्षाविदाम् अभिमतं प्रतिपादयत्ति।

## I. कठोपनिषदि इत्थं वर्णिता

सहनाववतु सह नौ भुनक्तुत सहवीर्यं करवावहै। तेजस्विनावधीतमस्तु मा विद्विषावहै ।। (कठोपनिषद्, शान्तिपाठः)
सहनाववतु अर्थात् शिक्षकाः शिक्षार्थिनः च परस्परं रक्षां कुर्युः। सह नौ भुनक्तु अर्थात् ज्ञानार्जनेन उपलब्धसिद्धीनां मिलित्वा उपभोगं कुर्युः। सहवीर्यं करवावहै अर्थात् परस्परं शौर्यरक्षां कुर्युः।तेजस्विनावधीतमस्तु अर्थात् अध्ययनं कृत्वा तेजस्विनः भवेयुः। मा विद्विषावहै अर्थात् परस्परम् ईर्ष्यारहिताः भवेयुः।सत्यमेव यत् शिक्षाप्रक्रिया काचित् चेतनशीला प्रक्रिया एव "शिक्षणं काचित् अन्तःक्रिया। एषा कक्ष्यागतपरिस्थितिषु काङ्क्षितलक्ष्यप्राप्तये छात्रशिक्षकयोः मध्ये प्रचलिता प्रक्रिया। एतस्याः मुख्यमुद्देश्यम् अध्येतॄणां व्यवहारे परिवर्तनम्।"भाषायाः एषः व्यवहारः'श्रवणं भाषणं पठनं लेखनम्' च इति चतुर्षु भाषाकौशलेषु निहितः। एतानि चत्वारि कौशलानि एव भाषाव्यवहारस्य आधारभूतानि तत्त्वानि। एतेषां पुनः पुनः अभ्यासस्य आवश्यकता अस्ति। कथ्यते अपि 'अभ्यासशालिनी सा विद्या' इति । अत्रैव प्रशिक्षणस्य आवश्यकता निहिता अस्ति । इदमेव प्रशिक्षणस्य आवश्यकतां प्रतिपादयति ।

**संस्कृतशिक्षणे पाठ्य-सहगामि-क्रियायाः महत्त्वम्**

छात्राणां सर्वाङ्गीणविकासाय पाठ्यसहगामिक्रियाणां का आवश्यकता ? किं च महत्त्वं वर्तते ?
इत्येतादृशानां प्रश्नानां समाधानाय शिक्षाव्यवस्थायां निरन्तरं नूतनानि परिवर्तनानि परिष्काराः च भवन्ति । एतस्मात् कारणात् शिक्षया सम्बद्धानि घटकानि यथा शैक्षिकप्रबन्धनं, प्रशासनं, पाठ्यचर्या, पाठ्यक्रमः, शिक्षणप्रक्रिया, मूल्याङ्कनम् इत्यादीनि पूर्णतया आंशिकरूपेण वा प्रभावितानि भवन्ति । छात्राः खलु शिक्षायाः घटकेषु अन्यतमाः, तैः न केवलम् आत्मनि परिवर्तनं कर्तव्यं भवति अपितु अन्यघटकानां परिवर्तनानि अपि अवगन्तव्यानि भवन्ति। बहुधा छात्राः एतानि परिवर्तनानि परिष्कारान् च अङ्गीकर्तुं समर्थाः न भवन्ति। अत एव शिक्षणप्रक्रियां सरलां कर्तुं पाठ्यसहगामिक्रियाणाम् अपेक्षा अनुभूयते। **महात्मगान्धिनः इदं कथनम् यत्** - सही शिक्षा तो छात्र-छात्राओं में अन्तर्निहित सर्वोत्तम गुणों को प्रकाशित करना है। केवल अव्यवस्थित और अवाञ्छित सूचनाएँ विद्यार्थियों के दिमाग में भर देने से ऐसा कभी नहीं हो सकता। यह तो उनके मन पर निष्प्राण बोझ बन कर उनकी समग्र मौलिकता को नष्ट कर देता है और उन्हें यन्त्रवत् बना देता है। (महात्मा गाँधी हरिजन, १ दिसम्बर १९३३) बालानां सर्वाङ्गीणविकासःइत्येव शिक्षायाः प्रधानम् उद्देश्यम्। शारीरिक-बौद्धिक नैतिक-सामाजिकविकासः शिक्षया एव सम्भवति।१९९६ तमे खिष्टाब्दे

ISSN: 2582-7219 | www.ijmrset.com | Impact Factor: 8.206| ESTD Year: 2018|

International Journal of Multidisciplinary Research in Science, Engineering and Technology (IJMRSET)

(A Monthly, Peer Reviewed, Refereed, Scholarly Indexed, Open Access Journal)

## II. यूनेस्को इत्यस्य डेलोर्स-आयोगेन बालानां सर्वाङ्गीणविकासमुद्दिश्य शिक्षायाः चत्वारः स्तम्भाः वर्णिताः।

Learning to know (ज्ञानार्थं शिक्षा इति........ऋते ज्ञानान्न मुक्तिः) इत्यनेन बौद्धिकविकासः
Learning to do (कर्मार्थ शिक्षा इति. कर्मण्येवाधिकारस्ते....) इत्यनेन शारीरिकविकासः क्रियाशीलता च
Learning to live together (मिलित्वा वासः करणीयः इत्येतदर्थं शिक्षा सङ्गच्छध्वम् ......) इत्यनेन सामाजिकविकासः तथा च
Learning to be (मानवः भवितुं शिक्षा मनुर्भव) इत्यनेन नैतिकविकासः सम्भवति ।

शैक्षिकक्षेत्रे एतेषां चतुर्णां स्तम्भानां लक्ष्याणां वा परिपूर्तये पाठ्यचर्यायाः निर्माणं क्रियते। केवलं शैक्षिकपाठ्यचर्याद्वारा एतेषां लक्ष्याणां प्राप्तिः नैव भवितुम् अर्हति । वर्तमाने शिक्षायाः स्तरे जायमानानां परिष्काराणां परिवर्तनानां च कारणात् छात्रेषु अध्ययनेन सह सुदृढस्य व्यक्तित्वविकासस्य अवसराः समुपलभ्यमानाः सन्ति । एतदर्थं पाठ्यचर्यायां पाठ्यसहगामिक्रियाणाम् आवश्यकता महत्त्वञ्च अधिकम् अनुभूयते । पाठ्यसहगामिक्रिया शिक्षणप्रक्रियायाः आवश्यकसोपानत्वेन परिगण्यते। पाठ्यसहगामिक्रियाः शिक्षायाः उद्देश्यप्राप्तये सहायिकाः भवन्ति। राष्ट्रियपाठ्यचर्यायाः रूपरेखायाः (२००५) सिद्धान्तानां पूर्तये विद्यालयेषु पाठ्यसहगामिक्रियाणां सञ्चालनम् अनिवार्यम् । अत्र उद्देश्यानि अपि निहितानि –

1. विद्यालयात् बाह्यजीवनेन सह ज्ञानस्य संयोजनम् ।
2. शिक्षणप्रक्रियायां कण्ठस्थीकरणप्रणाल्याः प्रयोगः केवलम् आवश्यकविषयेषु भवेत् ।
3. कण्ठस्थीकरणस्य अपेक्षया सम्प्रत्ययनिर्माणाय प्रयत्नः विधेयः।
4. परीक्षायाः प्रारूपं कक्ष्यागतिविधिभिः सम्बद्धं भवेत् ।
5. प्रजातान्त्रिक-राज्यव्यवस्थायां राष्ट्रियचिन्ता अपि समाहिता भवेत् ।

## III. अधिगम-अर्जनक्षमतायाः अभिवर्धनम्

पाठ्यसहगामिक्रिया शारीरिकरूपेण मानसिकरूपेण च अधिगमप्रक्रियायां सहभागं कर्तुं छात्राणां प्रोत्साहनं करोति । छात्राः यदा स्वस्थमनसा शरीरेण च शिक्षणप्रक्रियायां सम्मिलिताः भवन्ति, तदा अधिगम-अर्जनप्रक्रिया स्वाभाविकी भवति। स्वाभाविक्या अधिगम-अर्जनप्रक्रियया च मानसिकक्षमतायाः विकासः भवति। येन छात्राणाम् अधिगमक्षमता वर्धते। पाठ्यसहगामिक्रियाणां क्रियान्वयनं पाठ्यक्रमस्य समनन्तरं भवति। अत एव पाठ्यसहगामिक्रियाणां समाप्तौ बहूनि तत्त्वानि विषयाः सन्दर्भादयः च स्वाभाविकरूपेण अधिगताः अर्जिताः च भवन्ति । संस्कृतशिक्षणे अर्जनस्य महत्त्वपूर्णा भूमिका वर्तते। संस्कृतस्य अर्जनं भवेत्, न तु केवलम् अधिगमः। एतद् अनुभूतम् अस्ति यत् छात्राः शब्दरूपाणां धातुरूपाणां वा कण्ठस्थीकरणं सम्यक्तया कुर्वन्ति। परन्तु वातावरणस्य अभावेन तेषां प्रयोगक्षमता विकसिता न भवति। पाठ्यसहगामिक्रियाः विविध-गतिविधिना अधिगतस्य विषयस्य प्रयोगार्थं वातावरणस्य निर्माणं कुर्वन्ति । यत्र छात्राः सहजतया विषयस्य प्रयोगं कर्तुम् अर्हन्ति । विषयाणाम् एतादृशः व्यावहारिकः प्रयोगः मनोवैज्ञानिकः भवति। अनेन छात्राणां प्रयोगक्षमतायाः अभिवर्धनं जायते।
पाठ्यसहगामिक्रियाणां क्रियान्वयनं पाठ्यक्रमस्य समनन्तरं क्रियते।

**अन्वेषणात्मक-व्यवहारस्य मनन-क्षमतायाः च विकासः** - शिक्षणे न केवलं छात्रेषु अपितु अध्यापकेषु
अपि नूतन-तत्त्वानां तथ्यानां वा अन्वेषणात्मकव्यवहारस्य तथा विविधविषयेषु मननक्षमतायाः महती आवश्यकता वर्तते। पाठ्यसहगामिक्रियाः शिक्षणप्रक्रियायां छात्रेभ्यः अध्यापकेभ्यः च नूतन-तत्त्वानां तथ्यानां वा अन्वेषणस्य अथ च तेषां मननस्य अवसरान् कल्पयन्ति। पाठ्यसहगामिक्रियाः प्रायः गतिविध्यात्मकाः भवन्ति। गतिविधिना च अध्ययन-अध्यापने अन्वेषणात्मक-व्यवहारस्य मनन-क्षमतायाः च विकासः जायते । अनेन विषये रुचिः उत्पद्यते, छात्राः नूतनातिनूतनानि पुस्तकानि पठित्वा स्वस्य शब्दसम्पदां सुदृढां कर्तुं प्रोत्साहिताः भवन्ति। अन्वेषणात्मक-व्यवहारेण छात्रेषु जिज्ञासायाः तथा आलोचनात्मकचिन्तनस्य अभिवर्धनं भवति। मननक्षमतायाः अभिवर्धनेन छात्राः स्वानुभवैः अवगन्तुम् अधिगन्तुम् अर्जयितुं च समर्थाः भवन्ति। तस्मात् अन्वेषणात्मक-व्यवहारस्य मनन-क्षमतायाः च विकासः संस्कृतशिक्षणार्थं बहु अपेक्षितम् अस्ति। अत एव शिक्षणे पाठ्यसहगामिक्रियाणां समुचितोपयोगस्य आवश्यकता अनुभूयते। अधिगतस्य विषयस्य व्यावहारिकः प्रयोगः यथा वयं जानीमः एव यत् पाठ्यसहगामिक्रियाः प्रायः गतिविध्याधारिताः भवन्ति। गतिविधिषु सिद्धान्तानाम् अनुप्रयोगः क्रियते अथवा गतिविधयः प्रयोगाधारिताः भवन्ति। अतः पाठ्यसहगामिक्रियायां छात्राः पठितस्य अधिगतस्य वा विषयस्य व्यवहारे प्रयोगं तथा परस्परम् अन्तः क्रियया विषयस्य अर्जनम् अपि कर्तुं शक्नुवन्ति। अनेन विषयस्य ज्ञानं स्थायि भवति, विषयस्य स्पष्टावबोधः च जायते। विशिष्य भाषायाः अर्जनार्थम् अनुप्रयोगार्थं च पाठ्यसहगामिक्रियाः अत्यन्तम् उपयुक्ताः भवन्ति। यतोहि भाषायाः अध्यापनं केवलं पुस्तकाधारितं न भवितुमर्हति इति वयं जानीमः एव। अस्मिन् सन्दर्भे संस्कृतस्य

© 2025 IJMRSET | Volume 8, Issue 7, July 2025| DOI:10.15680/IJMRSET.2025.0807061

ISSN: 2582-7219 | www.ijmrset.com | Impact Factor: 8.206| ESTD Year: 2018|

International Journal of Multidisciplinary Research in Science, Engineering and Technology (IJMRSET)

(A Monthly, Peer Reviewed, Refereed, Scholarly Indexed, Open Access Journal)

दशदिवसात्मकं सम्भाषणशिबिरं शिक्षणे पाठ्यसहगामिक्रियायाः सर्वोत्तमम् उदाहरणं भवितुमर्हति। शिबिरे वस्तुप्रदर्शनेन काल्पनिके अथवा वास्तविकपरिवेशे विषयाणाम् उपस्थापनं क्रियते । वास्तविक पदार्थानां वस्तूनां प्रदर्शनेन कक्ष्या गतिशीला भवति। छात्राणाम् अधिगमक्षमता अपि वर्धते।

**पाठ्यसहगामिक्रियासु पाठस्य पृष्ठभूमेः प्रयोगः** - प्रत्येकं पाठस्य काचित् पृष्ठभूमिः आवश्यकी भवति। यथा काव्याधारिता, विज्ञानाधारिता, समाजाधारिता अथवा संस्कृतवाङ्मयाधारिता इति । पाठस्य पृष्ठभूमिम् उद्देश्यानि आधृत्य प्रवर्तते पाठ्यसहगामिक्रियायाः आयोजनार्थं पाठानां पृष्ठभूमिः आधारभूता भवति। पाठेन सम्बद्धानां तथ्यानां स्पष्टाभिज्ञानम् अनया क्रियया जायते ।

**पाठ्यसहगामिक्रियाः वास्तविकजीवनेन सम्बद्धाः** -पाठ्यसहगामिक्रियासु सामूहिकप्रयासः, वैयक्तिकावदानम्, मित्रता, धैर्यं, दया, सहयोगः इत्यादीनां तत्त्वानां समावेशः भवति। एतानि तत्त्वानि छात्राणां जीवनेन साक्षात् सम्बद्धानि भवन्ति । पाठ्यसहगामिक्रियासु प्रत्यक्षरूपेण अप्रत्यक्षरूपेण वा छात्राः एतेषां तत्त्वानाम् उपयोगं कुर्वन्ति एव।
सम्बद्धत्वात् सामाजिक परिस्थितिष अधिगतानि तत्त्वानि पाठ्यसहगामिक्रियायाः सम्पादने सहायकानि भवन्ति ।

**सामाजिक-व्यक्तित्वस्य विकासः** - समाजिकोद्देश्यानां पूर्तये समाजः तदनुकूल-शिक्षाव्यवस्थायाः निर्माणं करोति। सामाजिक-व्यक्तित्व-सम्पन्नानां सदस्यानां निर्माणं समाजस्य प्रमुखं लक्ष्यं वर्तते। तदनुगुणम् एव शिक्षाव्यवस्था प्रवर्तते। अस्मिन् सन्दर्भ पाठ्यसहगामिक्रिया अत्यन्तम् उपयोगिनी भवति। यतो हि प्रायः गणेषु पर्याप्तं सामाजिकवैविध्यं भवति। पाठ्यसहगामिक्रियासु छात्राः सामाजिकवैविध्ये गतिविधिं कुर्वन्ति। अनेन छात्राणां सामाजिक-सांस्कृतिक-धार्मिक-वैयक्तिक-तत्त्वानां परस्परम् आदान-प्रदानं भवति। अतः शिक्षणे छात्राणां सामाजिक-व्यक्तित्वस्य विकासाय पाठ्यसहगामिक्रियायाः आवश्यकता अपरिहार्या अस्ति।

## IV. संस्कृतशिक्षणेन सम्बद्धानां पाठ्यसहगामिक्रियाणाम् उद्देश्यानि

1. छात्राणां शब्दभण्डारस्य वर्धनम् ।
2. छात्रेषु संस्कृतभाषिकक्षमतायाः वर्धनम् ।
3. संस्कृतभाषिकतत्त्वानां ज्ञानप्रदानम् ।
4. छात्रेषु कल्पना-तर्क-निरीक्षणशक्तीनां विकासः।
5. शुद्धोच्चारणाय छात्राणाम् अनुप्रेरणम् ।
6. संस्कृतसाहित्यं प्रति रुच्युत्पादनम् ।
7. छात्रेषु काव्यं प्रति स्नेहभावनायाः जागरणम् ।
8. छात्रेषु अभिव्यक्तिकौशलस्य विकासः ।
9. छात्रेषु सर्जनात्मकशक्तेः उन्मेषणम् ।
10. छात्रेषु आत्मविश्वासभावनायाः जागरणम् ।
11. अवकाश-क्षणेषु सर्जनात्मकशैल्याः उपयोगं कर्तुं छात्राणां प्रोत्साहनम् ।
12. आत्ममूल्याङ्कनाय अवसरं दत्त्वा स्वकीयं परिष्कारं कर्तुं छात्राणाम् अभिप्रेरणम् ।
13. नेतृत्वक्षमतायाः विकासः ।
14. नैतिकमूल्यानां संवर्धनम् ।
15. सैद्धान्तिकज्ञानं व्यावहारिकज्ञानरूपेण परिवर्तयितुं छात्रेभ्यः अवसरप्रदानम् ।
16. सैद्धान्तिकज्ञानस्य व्यवहारे प्रयोगे कर्तुं छात्रेभ्यः अवसर ।
17. संस्कृतशिक्षणेन सम्बद्धपाठ्यसहगामिक्रियाः काश्चन पाठ्यसहगामिक्रियाः एवं भवन्ति

**साहित्यिकगतिविधयः**
१. वाद-विवादः
२. भाषणम् (अ) व्याख्यानमाला

छात्राणां कृते सम्भषणशिबिराणाम् आयोजनम्
(ब) (i) पूर्वनिर्धारितविषयः

© 2025 IJMRSET | Volume 8, Issue 7, July 2025| DOI:10.15680/IJMRSET.2025.0807061
ISSN: 2582-7219 | www.ijmrset.com | Impact Factor: 8.206| ESTD Year: 2018|
International Journal of Multidisciplinary Research in Science, Engineering and Technology (IJMRSET)
(A Monthly, Peer Reviewed, Refereed, Scholarly Indexed, Open Access Journal)

(ii) तत्स्थलीयभाषणम्
३. संस्कृतस्य दुर्लभग्रन्थानां पाण्डुलिपीनाञ्च प्रदर्शनी
४. कविसम्मेलनम्
५. श्लोकपाठः
६. कथाकथनं कथालेखनञ्च
७. निबन्धलेखनम्
८. विद्यालयपत्रिका
९. विचारगोष्ठयः
१०. संस्कृतसाहित्यसम्बद्धक्रीडाः

**सांस्कृतिकगतिविधयः**
१. नाट्याभिनयः
२. एकाङ्कि-नाटकम्
३. संस्कृतगीतम्
४. संस्कृतदिवसस्य संस्कृतसप्ताहस्य च आयोजनम्
५. कवीनां जन्मदिवसानाम् आयोजनम्
६. यज्ञयागादीनां निर्वहणम् ।
यथा- संस्कृतप्रश्नोतरी-अन्त्याक्षरी-सुभाषितप्रतियोगिता-समस्यापूर्ति-प्रहेलिका- विनोदकणिका-शब्दक्रीडादयः ।

## V. विद्यालये पाठ्यसहगामिक्रियाणां सञ्चालनस्य प्रकारद्वयं भवति -

**वैयक्तिकम्**
**सामूहिकम्**
प्रत्येकमपि छात्रे वैयक्तिकभिन्नताः विशिष्टप्रतिभाः च भवन्ति। छात्राणां वैयक्तिकभिन्नताम् अवगन्तु तेषा विशिष्टप्रतिभां च विज्ञातं वैयक्तिकरूपेण अपि पाठ्यसहगामिक्रियाणाम आयोजनं क्रियते। काश्चन पाठ्यसहगामिक्रियाः यथा -

1. आशुभाषणम्
2. चित्रवर्णनम्
3. भाषणम्
4. वादविवादः
5. कथाकथनम्
6. प्रबन्धलेखनम्
7. श्लोकपाठः
8. एकलाभिनयः

1)एकलगीतम्
**सामूहिकपाठ्यसहगामिक्रियाः**
बालानां सर्वाङ्गीणविकासे सामूहिकपाठ्यसहगामिक्रियाः मार्गदर्शिकाः भवन्ति। एतादृश्यः क्रियाः सामाजिकजीवनस्य आधारूपाः भवन्ति । अनेन केषाञ्चन विशेषोद्देश्यानां पूर्तिः भवति । तानि विशेषोद्देश्यानि यथा 'सङ्गच्छध्वं संवदध्वम्' इति भावनायाः विकासः।
विभिन्नासु परिस्थितिषु एकीभूय कार्यकरणम् ।
मैत्रीभावनायाः संवर्धनम्।
व्यवस्थितरूपेण कार्यकरणप्रवृत्तेः विकासः ।
'पादं सब्रह्मचारिभ्यः' इत्यस्य कथनस्य आपूर्तिः।
एतादृशानाम् उद्देश्यानां पूर्त्यर्थं क्रियमाणाः काश्चन पाठ्यसहगामिक्रियाः एवं भवन्ति –

1. विद्यालय-पत्रिकायाः
2. विचारगोष्ठी

© 2025 IJMRSET | Volume 8, Issue 7, July 2025| DOI:10.15680/IJMRSET.2025.0807061

ISSN: 2582-7219 | www.ijmrset.com | Impact Factor: 8.206| ESTD Year: 2018|

International Journal of Multidisciplinary Research in Science, Engineering and Technology (IJMRSET)

(A Monthly, Peer Reviewed, Refereed, Scholarly Indexed, Open Access Journal)

3. प्रायोजना-कार्यम्
4. निर्माणम्
5. सामूहिक सहगामि-कार्यक्रमाणाम् आयोजनम्
6. क्रियाः
7. नाट्याभिनयः
8. (सामूहिकगीतम्)
9. सामूहिक-श्लोकपाठः

विद्यालयेषु पाठ्यसहगामिक्रियात्वेन छात्रेषु सर्जनात्मकशक्तेः मौलिकचिन्तनस्य च विकासाय विद्यालयेषु पत्रिकालेखने प्रकाशने च बलं प्रदीयते। यदा छात्राणां स्वरचिताः रचनाः सङ्गृहीताः उत्तमविषयाः च कक्ष्यायाः भित्तौ तथा च कक्ष्यायाः बहिर्भागे वीथिकायां भित्तौ प्रदर्शिताः भवन्ति तदा सा भित्तिपत्रिका इति कथ्यते। अस्याः पत्रिकायाः सम्पादनार्थं सम्पादकमण्डलस्य निर्माणमपि क्रियते। अस्याः संस्करणं भवितुं शक्यते। दीपावलीहोलिकादिषु पर्वसु राष्ट्रियपर्वसु च अस्याः विशेषाङ्काः अपि प्रदर्शयितुं शक्यन्ते ।

संस्कृतभाषाशिक्षणे संस्कृतसम्बद्धाः लेखाः, पत्रपत्रिकाः सुभाषितवाक्यानि च भित्तिपत्रिका-रूपेण स्थापयितुं शक्यन्ते। विद्यालयेषु प्रत्येकं कक्ष्यायाः बहिः अन्तः च प्राचार्यकक्षस्य शिक्षककक्षस्य पुस्तकालयादीनां च अन्तः अपि भविष्यन्ति। अपि तु छात्राणां मूल्यानां विकासेऽपि अवश्यमेव सहयोगिनः भविष्यन्ति। भित्तिपत्रिका अपि दृश्योपकरणम् संस्कृत श्लोकानां लेखनं भित्तौ कारयितुं शक्यते। यच्च केवलं संस्कृतशिक्षणस्य हेतोः वातावरणनिर्माण सहायकाः अस्ति। शिक्षणे एतादृशानां दृश्योपकरणानां विशिष्टं महत्त्वं भवति । यथा -

अ. वातावरणनिर्माणे भित्तिपत्रिकादीनि उपकरणानि सहायकानि भवन्ति।
आ. विभिन्नानाम् अमूर्तविचाराणां, प्रत्ययानां प्रक्रियाणां च स्पष्टीकरणाय सहायकानि भवन्ति।
इ. एतैः अल्पसमये छात्रेभ्यः अधिकाधिकं तथ्यात्मकं ज्ञानं प्रदातुं शक्यते।

**पाठ्यसहगामिक्रियाणां सञ्चालने शिक्षकाणां भूमिका दायित्त्वं च -**
1. अत्र शिक्षकाः व्यवस्थापकाः सहयोगिनः मार्गदर्शकाश्च भवेयुः ।
2. पाठ्यसहगामिक्रियाणां सञ्चालनाय शिक्षकाः उत्तमाः योजनाकर्तारः भवेयुः।
3. शिक्षकः शिक्षिका वा छात्राणां कृते अधिकम् अवसरं प्रयच्छेत् ।
4. शिक्षकाः उत्तमाः आयोजकाः भवेयुः।
5. पाठ्यसहगामिक्रियाणां समये शिक्षकाः, निर्देशकाः, ध्वनिमुद्रकाः, प्रबन्धकाः, निर्णायकाः, परामर्शकाः, प्रेरकाः, समन्वयकाः वा भवेयुः।
6. शिक्षकः शिक्षिका वा प्रत्येकमपि छात्राय छात्रायै च विशेषम् अवधानं प्रयच्छेत् ।
7. छात्राः कुत्रापि शारीरिक-मानसिककष्टं न प्राप्नुयुः इति अवधानं दातव्यम् ।
8. पाठ्यसहगामिक्रियाणां सामग्रीणां चयनं सम्यक्तया करणीयम् ।
9. सामग्रीणां मानदण्डमपि पूर्वमेव परीक्षणीयम् ।
10. पाठ्यसहगामिक्रियाः शिक्षणोद्देश्यपूर्तये समर्थाः उत न इति विचारणीयम् ।
11. पाठ्यसहगामिक्रियाणां सञ्चालनं निर्दिष्टसमयाभ्यन्तरे भवेत् इति अवधातव्यम् ।
12. कक्ष्यायाः प्रत्येकं छात्रः छात्राः वा क्रियासु भागग्रहणं कुर्यात्। यदि कश्चन काचन वा भागग्रहणं न करोति तर्हि किमर्थं भागग्रहणं न कृतम् इति पृष्ट्वा उत्तमा व्यवस्था करणीया ।
13. क्रियाणां समये विशृङ्खलता न उत्पद्येत इत्येतदर्थं शिक्षकाः प्रतिक्षणं सक्रियाः भवेयुः।
14. पाठ्यसहगामिक्रियाणां नियमाः छात्राणां कृते सम्यक्तया बोधनीयाः।
15. पाठ्यसहगामिक्रियाणां सन्दर्भे शिक्षकाः निष्पक्षाः भवेयुः।

**पाठ्यसहगामिक्रियाणां लाभाः -**
एतादृशीनां क्रियाणां द्वारा बालानां सुप्तप्रतिभानां जागरणं सम्भवति । यथा केषाञ्चन गीतगायनं सम भवति, केषाञ्चन अभिनयः सम्यक् भवति, केषाञ्चन नायकत्वक्षमता सम्यक् भवति इति।
1. छात्राणां पाठ्यसहगामिक्रियासु भागग्रहणेन शिक्षणं तेषां कृते रुचिपूर्णं भवति ।

ISSN: 2582-7219 | www.ijmrset.com | Impact Factor: 8.206| ESTD Year: 2018|

International Journal of Multidisciplinary Research in Science, Engineering and Technology (IJMRSET)

(A Monthly, Peer Reviewed, Refereed, Scholarly Indexed, Open Access Journal)


2. भाषण-वादविवाद-आशुभाषणादीनां माध्यमेन छात्राणाम् अभिव्यक्तिक्षमतायाः विकासः भवति ।
3. शरीरसम्बन्धि-पाठ्यसहगामिक्रियाणां माध्यमेन छात्राणां शारीरिकविकासः सम्भवति ।
4. पाठ्यसहगामिक्रियाणां द्वारा छात्राः अधिकाः सक्रियाः भवन्ति ।
5. सामूहिकपाठ्यसहगामिक्रियाणां द्वारा छात्रेषु समभावनायाः विकासः भवति ।
6. पाठ्यसहगामिक्रियाणां द्वारा विद्यालये एव कुटुम्बभावनायाः विकासः भवति ।
7. पाठसम्बद्धानां पाठ्यसहगामिक्रियाणां द्वारा पाठविषये सुदृढं ज्ञानं भवति ।
8. पाठ्यसहगामिक्रियाणां द्वारा छात्राः समूहे कार्यकरणाय उत्सुकाः भवन्ति ।
9. पाठ्यसहगामिक्रियाणां द्वारा ज्ञांनस्य अर्जनं भवति ।
10. वास्तविकपरिस्थित्या सह छात्राः संलग्नाः भवन्ति ।
11. किमपि नूतनं कर्तुं प्रोत्साहिताः भवन्ति ।
12. पाठ्यसहगामिक्रियाणां प्रयोगक्षमताभिवर्धनम्
13. संस्कृतशिक्षणस्य उद्देश्यानि लक्ष्याणि वा व्यावहारिकरूपेण प्राप्तुं पाठ्यसहगामिक्रियाणां किञ्चित् विशिष्टं स्थानं महत्त्वं च मन्यते। अतः संस्कृतशिक्षकाः शिक्षिकाः एतादृशीनां क्रियाणां विषये जानीयुः तथा च कथं प्रयोगः करणीयः? इत्यस्मिन् विषये अभ्यस्ताः भवेयुः।

## VI. उपसंहारः

पाठ्यसहगामिक्रियाः छात्राणां व्यक्तित्वस्य सर्वाङ्गीणविकासार्थं शिक्षायाः पूर्वनिर्धारितानां लक्ष्याणां प्राप्तये अनुकूलवातावरणेन सह अवसरान् अपि कल्पयन्ति । एतासु क्रियासु छात्राः अध्यापकस्य उपस्थितौ अनुपस्थितौ वा उत्तरदायित्वपूर्वकं सुनियोजितरूपेण गतिविधौ प्रतिभागं कुर्वन्ति, गतिविधेः सञ्चालनं च कुर्वन्ति । **भाषाकौशलानां विकासः**, संवादशैल्याः निर्माणम् इत्यादीनां विविधानां कौशलानां विकासः अपेक्षितः भवति । पुस्तकीयं ज्ञानम् अपर्याप्तम्, पुस्तकीयज्ञानेन सहैव संसाधनानाम् उपयोगः, विषमपरिस्थितौ समायोजनं,एतदर्थम् अध्ययनाय पाठ्यसहगामिक्रिया शिक्षणस्य विविधस्तरेषु आवश्यकरूपेण महत्त्वपूर्णा भवति ।

## सन्दर्भ ग्रन्थ सूची-

1. शिक्षक सन्दर्शिका संस्कृत संवर्धन प्रतिष्ठानम् नई दिल्ली।
2. गुप्ता, एस०पी० (2006), भारतीय शिक्षा का इतिहास, विकास एवं समस्याएं, शारदा पुस्तक भवन, इलाहाबाद ।
3. पाठक, पी०डी० (2008), भारतीय शिक्षा और उसकी समस्याएं, अग्रवाल पब्लिकेशन, आगरा।
4. पाठक, पी०डी० (2013), शिक्षा मनोविज्ञान, अग्रवाल पब्लिकेशन, आगरा।
5. सक्सेना, सरोज (2009), विद्यालय प्रशासन एवं स्वास्थ्य शिक्षा, साहित्य प्रकाशन आगरा।
6. शर्मा, आर० ए० (2007), सामाजिक विज्ञान शिक्षण, आर० लाल० बुक डिपो, मेरठ।
7. डॉ ए बी भटनागर एवं डॉ अनुराग भटनागर, शिक्षा के समाजशास्त्रीय आधार (2014)
8. डॉ आर ए शर्मा, तुलनात्मक शिक्षा, आर लाल बुक डिपो।
9. डॉ आर ए शर्मा, अध्यापक शिक्षा एवं प्रशिक्षण तकनीकी, आर लाल बुक डिपो (2009)
10. एन आर स्वरूप, शिक्षा के दार्शनिक एवं समाजशास्त्रीय आधार, आर लाल बुक डिपो (2010)
11. NEW EDUCATION POLICY 2020 ।




INTERNATIONAL JOURNAL OF

MULTIDISCIPLINARY RESEARCH

IN SCIENCE, ENGINEERING AND TECHNOLOGY

| Mobile No: +91-6381907438 | Whatsapp: +91-6381907438 | ijmrset@gmail.com |

www.ijmrset.com